# 卐🙏श्रीरामशतनामस्तोत्र🙏卐

## शम्भुरुवाच

राघवं करुणाकरं भवनाशनं दुरितापहम् । माधवं खगगामिनं जलरूपिणं परमेश्वरम् ॥
पालकं जनतारकं भवहारकं रिपुमारकम् । त्वां भजे जगदीश्वरं नररूपिणं रघुनन्दनम् ॥

भूधवं वनमालिनं घनरूपिणं धरणीधरम् । श्रीहरिं त्रिगुणात्मकं तुलसीधवं मधुरस्वरम् ॥
श्रीकरं शरणप्रदं मधुमारकं व्रजपालकम् । त्वां भजे जगदीश्वरं नररूपिणं रघुनन्दनम् ॥

विट्ठलं मथुरास्थितं रजकान्तकं गजमारकम् । सस्तुतं बकमारकं वृषघातकं तुरगार्दनम् ॥
नन्दजं वसुदेवजं बलियज्ञगं सुरपालकम् । त्वां भजे जगदीश्वरं नररूपिणं रघुनन्दनम् ॥

केशवं कपिवेष्टितं कपिमारकं मृगमर्दनम् । सुन्दरं द्विजपालकं दितिजादनं दनुजार्दनम् ॥
बालकं खरमर्दनं ऋषिप्रपूजितं मुनिचिन्तितम् । त्वां भजे जगदीश्वरं नररूपिणं रघुनन्दनम् ॥

शंकरं जलशायिनं कुशबालकं रथवाहनम् । सरयूनतं प्रियपुष्पकं प्रियभूसुरं लवबालकम् ॥
श्रीधरं मधुसूदनं भरताग्रजं गरुडध्वजम् । त्वां भजे जगदीश्वरं नररूपिणं रघुनन्दनम् ॥

गोप्रियं गुरुपुत्रदं वदतां वरं करुणानिधिम् । भक्तपं जनतोषदं सुरपूजितं श्रुतिभिः स्तुतम् ॥
भुक्तिदं जनमुक्तिदं जनरञ्जनं नृपनन्दनम् । त्वां भजे जगदीश्वरं नररूपिणं रघुनन्दनम् ॥

चिह्लदं चिरजीविनं मणिमालिनं वरदोन्मुखम् । श्रीधरं धृतिदायकं बलवर्धनं गतिदायकम् ॥
शान्तिदं जनतारकं शरधारिणं गजगामिनम् । त्वां भजे जगदीश्वरं नररूपिणं रघुनन्दनम् ॥

शार्ङ्गिणं कमलाननं कमलादृशं पदपङ्कजम् । श्यामलम् रविभासुरं शशिसौख्यदं करुणार्णवम् ॥
सत्पतिं नृपपालकं नृपवन्दितं नृपतिप्रियम् । त्वां भजे जगदीश्वरं नररूपिणं रघुनन्दनम् ॥

निर्गुणं सगुणात्मकं नृपमण्डनं मतिवर्धनम् । अच्युतं पुरुषोत्तमं परमेष्ठिनं स्मितभाषिणम् ॥
ईश्वरं हनुमच्छ्रुतं कमलाधिपं जनसाक्षिणम् । त्वां भजे जगदीश्वरं नररूपिणं रघुनन्दनम् ॥

ईश्वरोदितमेतदुत्तममादराच्छतनामकम । यः पठेद् भुवि मानवस्तव भक्तिमांस्तपनोदये ॥
त्वत्पदं निजबन्धुदारसुतैर्यतैर्याश्चिरमेत्य नः । सोऽस्तु ते पदसेवने बहुतत्परो मम वाक्यतः ॥

(आनन्दरामायण, पूर्णकाण्ड ६।३२–५१)

THE HINDUDHARMA

Read More Stotras at www.thehindudharma.com